CGBSE | PARAKH

# आदर्श प्रश्नपत्र 2025–26

## विषयः–संस्कृतम्

(मुद्रित पृष्ठानां संख्या– 04) कक्षा – द्वादशी (मुद्रित प्रश्नानां संख्या– 19)

समयः 03:00 होराः पूर्णाङ्कः 80

---

निर्देशाः –(1) सर्वे प्रश्नाः समाधेयाः। (2) प्रश्नानामुत्तराणि सुमनोहराणि दोषरहितानि च अपेक्षितानि।
(3) सङ्केताभावे प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि।

---

पूर्णाङ्कः – 80 समयः 3 होराः

**1.** एकः प्रश्नः अतिलघुत्तरीयप्रश्नानां समुच्चयः भवेत्। यस्य खण्डद्वयं भवेत्–

(i) खण्ड–''अ'' इत्यस्मिन् क्र. 01 तः 05 पर्यन्तं (MCQ) बहुविकल्पीयप्रश्नाः भवेयुः। यत्र प्रतिप्रश्नं 01 अंकः निर्धारितः। **(1X5=05)**

(ii) खण्ड–''ब'' इत्यस्मिन् पञ्च एकपद–उत्तरीयप्रश्नाः (VSA) भवेयुः। यत्र प्रतिप्रश्नं 01 अंकः निर्धारितः। **(1X5=05)**

**2.** पञ्च प्रश्नाः लघुत्तरीय–प्रश्नाः भवेयुः। यत्र प्रतिप्रश्नं अङ्कद्वयं भवेत्। **(2X5=10)**

**3.** द्वौ प्रश्नौ लघुत्तरीय–प्रश्नौ भवेताम्। यत्र प्रतिप्रश्नं अङ्कत्रयं भवेत्। **(3X2=06)**

**4.** चत्वारः प्रश्नाः सविकल्प–दीर्घोत्तरीय–प्रश्नाः भवेयुः। यत्र प्रतिप्रश्नं 04 अङ्कः भवेयुः। **(4X4=16)**

**5.** षड् प्रश्नाः सविकल्प–दीर्घोत्तरीय–प्रश्नाः भवेयुः। यत्र प्रतिप्रश्नं 05 अङ्काः भवेयुः।

**6.** एकः प्रश्नः सविकल्प–**अति**दीर्घोत्तरीय–प्रश्नः भवेत्।यस्मिन् 08 अङ्काः भवेयुः। यस्य खण्डद्वयं भवेत्– **(4x2=08)**

(i) **खण्ड–''अ'' इत्यस्मिन** 04 अङ्काः

(ii) **खण्ड–''ब'' इत्यस्मिन** 04 अङ्काः

प्रश्न 1 (अ) उचितं शब्दं चित्वा लिखन्तु– (1×5=5)

(i) 'पादध्वनिः' इति पदे समासः वर्तते–
(क) तत्पुरुषसमासः (ख) बहुव्रीहिसमासः (ग) द्विगुसमासः (घ) द्वन्द्वसमासः

(ii)'नमः' योगे विभक्तिः भवति –
(क) पञ्चमी (ख) तृतीया (ग) चतुर्थी (घ) सप्तमी

(iii) 'सुमित्रामातः' इति पदस्य पर्यायपदम् अस्ति–
(क) हे सुमित्रे! (ख) हे लक्ष्मण! (ग) हे राम! (घ) हे माता!

(iv) प्रतिमानाटकम् इति ग्रन्थस्य रचनाकारः अस्ति –
(क) महाकविकालिदासः (ख) महाकविभासः (ग) आचार्यचाणक्यः (घ) महाकविभारविः

(v) 'विष्णुशर्मा' इति नाम्ना विप्रेण लिखितं कथासाहित्यम् अस्ति–
(क) कादम्बरी (ख) कथासरित्सागरः (ग) वैतालपञ्चविंशतिः (घ) पञ्चतन्त्रम्

(ब) अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु– (1×5=5)

(1) 'हस्तेनैव' इति पदे कः सन्धिः वर्तते ?

(2) गद्यपद्यमयं काव्यं................अभिधीयते।

(3) 'निधाय' इत्यस्य प्रकृतिं प्रत्ययं च पृथक् कुर्वन्तु।

(4) आचार्यः कम् अनुशास्ति ?

(5) 'प्रजानुरञ्जको नृपः' इति पाठः कस्मात् ग्रन्थात् सङ्कलितः ?

प्रश्न 2. अधोलिखितवाक्ययोः रेखाङ्कितपदयोः सन्धिविच्छेदं कुर्वन्तु– (2)

(i)आर्य! गुणाः <u>खल्वत्र</u>।

(ii)दीपस्य समीपमागत्य <u>सन्यासिनोक्तम्</u>।

प्रश्न 3. अधोलिखितवाक्ययोः रेखाङ्कितविच्छेदपदयोः सन्धिं कुर्वन्तु– (2)

(i)संवृते <u>किञ्चित् + अन्धकारे</u>।

(ii)<u>एकेन + अपि</u> सुपुत्रेण।

प्रश्न 4. अधोलिखिते वाक्ये कः कथयति– (2)

(i)न शक्नोमि रोषं धारयितुम्।

(ii)इत आयाहि किमपि कर्णे कथयिष्यामि।

प्रश्न 5. महाकविकालिदासस्य द्वयोः रचनयोः नाम्नी लिखत। (2)

प्रश्न 6. प्रहसनस्य परिभाषां स्वभाषया लिखत। (2)

प्रश्न 7. अधोलिखितवाक्येषु कोष्ठकात् उचितविभक्तिपदान् चित्वा रिक्तस्थानपूर्तिं कुर्वन्तु– (3)

(अ) कैकेय्याः भर्ता ........... समः आसीत्। (शक्रेण/शक्रात्)

(ब) दिलीपस्य आगमः ........................ सदृशः अस्ति। (प्रज्ञया/प्रज्ञायै)

(स) शिववीरस्य आज्ञां वयं ................ वहामः। (शिरसि/शिरसा)

प्रश्न 8. महाकाव्यस्य कापि तिस्रः विशेषताः स्वभाषया लिखन्तु। (3)

प्रश्न 9. अधोलिखितवाक्यद्वयोः रेखाङ्कितपदयोः समासविग्रहं कृत्वा लिखन्तु–(केषाञ्चिदपि चतुर्णाम्) (4)

(क) यानि <u>अनवद्यानि</u> कर्माणि। (ख) लक्ष्मणो <u>धैर्यसागरः</u>।

(ग) तासां पितरः केवलं <u>जन्महेतवः</u>। (घ) <u>कठोरभाषणैः</u> तिरस्करोषि।

(ङ) <u>गम्भीरस्वरेण</u> अवदीत्। (च) <u>अपूर्वः</u> खल्वस्यामासः।

प्रश्न 10. अधोलिखितपद्यांशमनुसृत्य प्रदत्तप्रश्नान् संस्कृतेन उत्तरत– (4)

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।

**प्रश्नाः**

(i) केषां धनं त्यागाय भवति ?

(ii) विजिगीषूणां जयः कस्मै भवति ?

(iii) 'अल्पभाषिणाम्' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

(iv) 'सङ्ग्रहाय' इत्यस्य विलोमपदं किं प्रयुक्तम्?

**अथवा**

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इव राजेन्दुरिन्दुः क्षीरनिधाविव ।।

प्रश्नाः

(i) कविना राजेन्दुः कः कथितः ?

(ii) कीदृशे अन्वये दिलीपः प्रसूतः ?

(iii) 'उत्पन्नः' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

(iv) 'प्रसूतः' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

प्रश्न 11. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् कांश्चिदपि चतुरः प्रश्नान् संस्कृतेन उत्तरत– (4)

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय–प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि।

प्रश्नाः

(i) कम् अनूच्य आचार्यः अन्तेवासिनमनुशास्ति ?

(ii)कीदृशानि कर्माणि सेवितव्यानि ?

(iii) 'मातृदेवो भव' अत्र क्रियापदं किम् ?

(iv)'न' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(v) 'अनवद्यानि कर्माणि' इत्यनयोः विशेष्यपदं किम् ?

(vi) 'गुरवे' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

प्रश्न 12. अधोलिखितनाट्यांशमनुसृत्य प्रदत्तप्रश्नेषु कांश्चिदपि चतुरः प्रश्नान् संस्कृतेन उत्तरन्तु– (4)

लक्ष्मणः –(सक्रोधम्) कथं कथं मोहमुपगत इति।

यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयां<br>
स्वजननिभृतः सर्वोप्येवं मृदुः परिभूयते।<br>
अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो<br>
युवतिरहितं लोकं कर्तुं यतश्छलिता वयम्।।

सीता – आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।

रामः – सुमित्राामातः! किमिदम्?

लक्ष्मणः – कथं कथं किमिदं नाम।

प्रश्नाः

(i) लक्ष्मणः किं कर्तुं कृतनिश्चयः ?

(ii) रोदितव्ये काले केन धनुर्गृहीत् ?

(iii) 'संसारम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(iv) 'छलिता वयम्' अनयो' पदयोः क्रियापदं किम् ?

(v) 'मुञ्च' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(vi) 'युवतिरहितं लोकं' इत्यनयोः विशेषणपदं किम् ?

प्रश्न 13.अधोलिखितवाक्येषु कोष्ठकान्तर्गतप्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयन्तु–(केषाञ्चित्पञ्चानाम्)(5)

(क) मातुः परिवादं न ..........(श्रु + तुमुन्) इच्छामि।

(ख) ननु ............(वच् + तव्यत्)।

(ग) वैवस्वतो मनुर्नाम् ............(मान् + अनीयर्) मनीषीणाम्।

(घ) शठः सहस्रैरपि ............ (शिक्ष् + शानच्)।

(ङ) स्कन्धे निधाय निपुणं .......... (निः + ईक्ष् + शानच्)।

(च) पुरतः ............(दृश् + शतृ) सत्यपि।

प्रश्न 14. स्वपाठ्यपुस्तकस्य सूक्तिसौरभम् इति पाठात् द्वौ श्लोकौ लिखन्तु यौ अस्मिन् प्रश्नपत्रे न समागतौ। (5)

अथवा

अधोलिखितश्लोकद्वयस्य प्रदत्तान्वययोः मञ्जुषात्प्रदत्तपदैः रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखन्तु–

| न, अन्धः, लोचनम्, अनेकसंशयोच्छेदि, दर्शकम्, पुनः कर्माणि, आरभमाणम्, पुरुषम्, श्रान्तः |
|---|

(अ) आरभेत हि कर्माणि श्रान्तः श्रान्तः पुनः पुनः।
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।।

अन्वयः – (i). ................ श्रान्तः (ii) ................ पुनः हि (iii) ................ आरभेत श्रीः कर्माणि (iv)............ हि (v).............निषेवते।

(ब) अनेकसंशयच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।

अन्वयः – शास्त्रम् (i) ................ परोक्षार्थस्य (ii) ................. (शास्त्रम्) सर्वस्य (iii) ................ यस्य (iv) ................ अस्ति सः (v) .............एव।

प्रश्न 15. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां पूर्णवाक्येन लिखन्तु। (केषाञ्चिदपि पञ्चानाम्) (5)

(i) रामस्य अभिषेकः कथं निवृत्तः ?

(ii) रविः रसं किमर्थम् आदत्ते ?

(iii) एकशरीरसंक्षिप्ता का रक्षितव्या ?

(iv) महीक्षिताम् आद्यः कः आसीत् ?

(v) रात्रौ के के प्रविशन्ति ?

(vi) कः कण्टकजालं पश्यति ?

प्रश्न 16. प्रदत्तशब्दसूची–साहाय्येन अधोलिखितलघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखन्तु– (5)

दक्षिणात्ये जनपदे (1).............नाम नगरम्। तस्य निकटे एकः (2)................आसीत्। तत्र चित्रग्रीवः कपोतराजः (3)...............। एकदा कश्चिद् व्याधः तत्र आगच्छत्। सः वृक्षस्य (4).............जालं प्रसारयति। उपरि च (5)............क्षिपति। तण्डुलान् (6)..............आगताः कपोताः जाले बद्धाः अभवन्। सर्वे कपोताः मिलित्वा (7)............सह उदपतन्। ते जालं नीत्वा मूषकराजस्य (8)..............पार्श्वे अगच्छन्। सः तेषां (9)...............आसीत्। हिरण्यकः जालम् (10)................, एवं कपोताः मुक्तः अभवन्।

| –ः मञ्जुषा ः– |
|---|
| मित्रम्, हिरण्यकस्य, भक्षयितुम्, अधः, विशालवृक्षः, महिलारोप्यम्, वसति स्म, जालेन, अकृन्तत्, तण्डुलकणान् |

अथवा

एकां लघुकथां न्यूनतमपञ्च वाक्येषु संस्कृतेन लिखन्तु।

प्रश्न 17. अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुर्वन्तु– (केषाञ्चिदपि पञ्चानाम्) (5)

(i) गाँव के चारों ओर वृक्ष हैं।

(ii) श्रीराम को नमस्कार।

(iii) अर्जुन के जैसा धनुर्धर नहीं हैं।

(iv) नदियों में गङ्गा पवित्र है।

(v) पढ़ने के बाद वह खेलता है।

(vi) कवियों में कालिदास श्रेष्ठ है।

प्रश्न 18. मञ्जुषायां प्रदत्तशब्दैः प्रधानाचार्यां प्रति अवकाशं ग्रहीतुं लिखिते प्रार्थनापत्रे रिक्तस्थानानि पूरयन्तु– (5)

सेवायाम्

(1).............
सर्वोदय–वरिष्ठविद्यालयः,
हरिद्वारम्

विषयः – (2).......................प्रार्थनापत्रम्।

(3)..............

(4)..............निवेद्यते यत् मम भगिन्याः (5).............अगस्तमासस्य अष्टाविशत्यां (6)............ भविष्यति। मया च तत्र विवाहात् (7)..............अवश्यं गन्तव्यम्। अतः कृपया 26–11–2020 दिनाङ्कात् 28–11–2020 दिनाङ्कपर्यन्तं .(8)............दिवसयोः अवकाशं .(9).............माम् अनुगृह्णन्तु भवन्तः।

(10)...............

भवदीयः शिष्यः
वरदराजः

| –ःमञ्जुषाः– |
|---|
| **सधन्यवादम्, अवकाशाय, प्रदाय, मान्याः, द्वयो, सादरम्, तारिकायाम्, विवाहः, दिनद्वयपूर्वम्, प्रधानाचार्याः।** |

**अथवा**

मित्रं प्रति किमपि एकं पत्रं संस्कृतेन लिखन्तु।

प्रश्न 19 अधोलिखितापठितगद्याशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि लिखन्तु– (8)

तुलसी केन वा न जायते ? भारते प्रतिगृहं सा भवति एव । भक्त्या सा प्रतिदिनं पूज्यते। केषुचित् विशिष्टेषु प्रसङ्गेषु तस्याः विशेष पूजा अपि क्रियते । बहूनां रोगाणाम् इव परिसरमालिन्यस्य निवारणेऽपि सा उपकरोति इति वदन्ति वैज्ञानिकाः। तस्याः एतत् वैशिष्ट्यम् एव एषु दिनेषु ताजभवनस्य संरक्षकाणाम् अवधानम् अपि आकृष्टवत् अस्ति। परिसर–मालिन्यकारणात् ताजभवनस्य सौन्दर्यं यत् विनश्यत् अस्ति तस्य निवारणाय तद्भवनसंरक्षकैः चिन्तितं यत् तुलस्याः सहायता स्वीकरणीया इति । अतः इदानीं ताजभवनपरिसरे सहस्रशः तुलसीपादपाः आरोपणीयाः। तुलसी आधिक्येन आम्लजनकम् उत्पाद्य हानिकराणाम् अनिलानां प्रभावं न्यूनीकरोति इति तु प्रमाणसिद्धं सत्यम् ।

प्रश्नाः (केषाञ्चिदपि अष्टानाम्)

(1) तुलसी केषाम् अनिलानां प्रभावं न्यूनीकरोति ?

(2) तुलसी कया प्रतिदिनं पूज्यते ?

(3) वैज्ञानिकाः किं वदन्ति ?

(4) ताजभवनसंरक्षकैः किं चिन्तितम् ?

(5) संसारे प्रतिगृहं का भवति ?

(6) 'विशिष्टेषु प्रसङ्गेषु' अनयोः पदयोः विशेषणपदं किम् ?

(7) 'हानिकराणाम् अनिलानाम्' अनयोः पदयोः विशेष्यपदं किम् ?

(8) 'न्यूनिकरोति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(9) ''भक्त्या सा प्रतिदिनं पूज्यते।'' अत्र सा इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(10) 'प्रासादस्य' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(11) 'अस्वीकरणीया' इत्यस्य विलोमपदं किं प्रयुक्तम्?

(12) गद्यांशस्य समुचितं शीर्षकं लिखन्तु।

---

(टीप–प्रश्न क्र. 11 एवं 12 के विकल्प भी दिये जा सकते हैं।)